आषाढ़ाभूः, पुं, (आषाढ़ा + भू + क्विप्।) मङ्गलग्रहः। इति हेमचन्द्रः॥

आषाढ़ी, स्त्री. (आषाढ़स्य इयं। आषाढ़ + अण् + ङीप्।) आषाढ़मासस्य पूर्णिमा। इति मेदिनी॥

आष्ट, क्ली, (अश्नुते व्याप्नोतीति अश् + ष्ट्रन् वृद्धिश्च।) आकाशं। इत्युणादिकोषः॥

आस, ञि ङ ल उपवेशने। (अदा०-आत्म०-अक०-सेट्।) इति कविकल्पद्रुमः। विद्यमानतायां। इति तट्टीका॥ ("आसने भगवानास्तां सद्देभिर्मुनिपुङ्गवैः"। इति रामायणे १ काण्डे) ञि आसितोऽस्ति। ल ङ आस्ते सिंहासने नृपः। विद्यमानतायामप्ययं। आकाशमास्ते। इति दुर्गादासः॥ (सम् + अधि) सम्यगुपवेशने। व्याप्तौ। यथा रघुवंशे, १३।५२।

"वीरासनैर्ध्यानजुषामृषीणा-
ममी समध्यासितवेदिमध्याः"।

(अनु) पश्चादुपवेशने। यथा रघौ, २।२४।

"तामन्तिकन्यस्तबलिप्रदीपा-
मन्वास्य गोप्ता गृहिणीसहायः"। इति।

उपासनायां। यथा रामायणे,—
"ततश्चीरोत्तरासङ्गः सन्ध्यामन्वास्य पश्चिमाम्"। इति।
(अभि) अभ्यासे। (उत्) उपेक्षायां। यथा माघे। २।४२।
"विधाय वैरं सामर्षे नरोऽरौ य उदासते"। इति।
(उप) समीपोपवेशने। यथा मनुः, ४।१५४।
"कृताञ्जलिरुपासीत गच्छतः पृष्ठतोऽन्वियात्"। इति।
बद्धाञ्जलिश्च गुरुसमीपमासीत इति तट्टीका॥
उपासनायां। यथा,—
"मय्यावेश्य मनो ये मां नित्ययुक्ता उपासते"। इति गीतायां १२।२। सेवने। यथा,—
"उपासते ये गृहस्थाः परपाकमबुद्धयः"। इति मनुः ३।१०४। परपाकमुपासते सेवन्ते इति तट्टीका। (निर्) निरासे। अपसारणे। (प्रति + सम्) प्रतिद्वन्द्वितयावस्थाने। "कोऽन्यः प्रतिसमासीत कालान्तकयमादृते"। इति भारतम्। इत्यादि।)

आसः, पुं, (अस्यन्ते शरा अनेनेति। अस् + करणे घञ्।) धनुः। इति हेमचन्द्रः॥

आसक्तः, त्रि, (आङ् + सञ्ज + क्तः।) आसक्तिविशिष्टः। तत्पर्य्यायः। तत्परः २ प्रसितः ३। इत्यमरः॥ (विषयान्तरपरिहारेण सर्व्वदा निविष्टः। यथा, किराते।११।२४।
"अथासक्तास्त्वमी मूढ़ा वामशीला हि जन्तवः"।)

आसक्तं, क्ली, (आङ् + सञ्ज + क्त।) नित्यं। सततं। अविरतं। इति जटाधरः॥

आसक्तिः, स्त्री, (आङ् + सञ्ज + क्तिन्।) आनुरक्तिः। आसङ्गः॥

आसङ्गं, क्ली, (आङ् + सञ्ज + घञ्।) अनवरतं। नित्यं। सततं। तद्युक्ते त्रि। इति जटाधरः॥

(यथा, कुमारे।५।९।

"न षट्पदश्रेणिभिरेव पङ्कजं
सशैवलासङ्गमपि प्रकाशते"।)।

तुवरी। सौराष्ट्रमृत्तिका इति यावत्। इति राजनिर्घण्टः॥ आसक्तिः॥ (यथा, गीतायां ४।२०।
"त्यक्त्वा कर्म्मफलासङ्गं नित्यतृप्तो निराश्रयः"।)

आसङ्गिनी, स्त्री, (आसङ्ग + इनि + ङीप्।) चक्रवातः। वातभ्रमः। इति त्रिकाण्डशेषः॥ घूर्णिया वातास इति भाषा।

आसत्तिः, स्त्री, (आङ् + सद् + क्तिन्।) सङ्गमः। लाभः। इति मेदिनी॥ (अविच्छेदः। निरन्तरं। यथा, साहित्यदर्पणे २य परिच्छेदे।
"वाक्यं स्याद् योग्यताकाङ्क्षासत्तियुक्तः पदोच्चयः"।
आसत्तिर्बुद्ध्यविच्छेदः" इति तट्टीका।)
न्यायमते पदसन्निधानकारणं। यत्पदार्थस्य यत्पदार्थेनान्वयोऽपेक्षितस्तयोरव्यवधानेनोपस्थितिकारणं। इति सिद्धान्तमुक्तावली॥

आसनं, क्ली, (आस्यते उपविश्यतेऽस्मिन्। आस् + अधिकरणे + ल्युट्।) पीठ। पिँड़ि चौकि इत्यादि भाषा। हस्तिस्कन्धदेशः। यत्र महामात्रो निवसति। विजिगीषोर्दुर्गादीनवर्द्धयतः स्थितिः। इत्यमरः॥ यात्रानिवर्त्तनं। इति मेदिनी॥ अष्टाङ्गयोगस्य तृतीययोगाङ्गं। तत्तु पद्मप्रकारकरचरणादिसंस्थानविशेषः। यथा,—

"पद्मासनं स्वस्तिकाख्यं भद्रं वज्रासनं तथा।
वीरासनमिति प्रोक्तं क्रमादासनपञ्चकम्"॥

तेषां क्रमः।

"ऊर्व्वोरुपरि विन्यस्य सम्यक् पादतले उभे।
अङ्गुष्ठौ च निबध्नीयात् हस्ताभ्यां व्युत्क्रमात्तथा॥
पद्मासनमिति प्रोक्तं योगिनां हृदयङ्गमम्॥ १॥
जानूर्व्वोरन्तरे सम्यक् कृत्वा पादतले उभे।
ऋजुकायो विशेन्मन्त्री स्वस्तिकं तत् प्रचक्षते॥२॥
सीमन्याः पार्श्वयोर्न्यस्येद्गुल्फयुग्मं सुनिश्चलम्।
वृषणाधःपादपार्ष्णी पाणिभ्यां परिबन्धयेत्॥
भद्रासनं समुद्दिष्टं योगिभिः सारकल्पितम्॥ ३॥
ऊर्व्वोः पादौ क्रमान्न्यस्येत् कृत्वा प्रत्यङ्मुखाङ्गुली।
करौ निदध्यादाख्यातं वज्रासनमनुत्तमम्॥ ४॥
एकपादमधः कृत्वा विन्यस्योरौ तथेतरम्।
ऋजुकायो विशेन्मन्त्री वीरासनमितीरितम्"॥५॥

इति तन्त्रसारः॥ अन्यच्च।

"आसनानि कुलेशानि यावन्तो जीवजन्तवः।
चतुरशीतिलक्षाणि चैकैकं समुदाहृतम्॥
आसनेभ्यः समस्तेभ्यः साम्प्रतं द्वयमुच्यते।
एकं सिद्धासनं नाम द्वितीयं कमलासनम्"॥

इति निरुक्ततन्त्रम्॥
षट्कारासनानि बन्धशब्दे द्रष्टव्यानि॥
उपवेशनाधारः। पीठादि। यथा।

श्रीभगवानुवाच।

"उपचारान् प्रवक्ष्यामि शृणु षोड़श भैरव।
यैः सम्यक् तुष्यते देवी देवोऽप्यन्यो हि मन्त्रितः॥
आसनं प्रथमं दद्यात् पौष्पं दारुजमेव वा।
वास्त्रं वा चार्म्मणं कौशं मण्डलस्योत्तरे न्यसेत्॥
पौष्पासनं यदिच्छितं यस्य तद्यदि गर्भकम्॥
निवेदयेत्तदा पद्मे विपुलं द्वारि चोत्सृजेत्।
पौष्पं पुष्पौघरचितं कुशसूत्रादिसंयुतं॥
अतिप्रीतिकरं देव्या ममाप्यन्यस्य भैरव।
यज्ञदारुसमुद्भूतमासनं महतां शुभम्॥
नोच्छ्रायं नातिविस्तीर्णमासनं विनियोजयेत्॥
अन्यदारुद्भवञ्चापि दद्यादासनमुत्तमम्॥
सकण्टकं क्षीरयुक्तं दारुसारविवर्जितम्।
चैत्यश्मशानसंभूतं वर्जयित्वा विभीतकम्॥
वाल्कलं कौषजं फालं वस्त्रमेतत्त्रयं मतम्।
रोमजं कम्बलञ्चैव तदनेन चतुष्टयम्॥
अनेन रचितं दद्यादासनं चेष्टभूतये।
सिंहव्याघ्रतरक्षूणां छागस्य महिषस्य च।
गजानां तुरगाणाञ्च कृष्णसारस्य चर्म्मणः।
चमरस्याथ रामस्य मृगाणां नवभेदिनाम्॥
चर्म्मभिः सर्व्वदेवानामासनं प्रीतिदं स्मृतम्।
वास्तेषु कम्बलं शस्तमासनं देवतुष्टये॥
राङ्कवं चार्म्मणं श्रेष्ठं दारवं चन्दनोद्भवम्।
यच्चासनं कुशमयं तदासनमनुत्तमम्॥
सर्व्वेषामपि देवानामृषीणाञ्च यतात्मनाम्।
योगपीठस्य सदृशमासनं स्थानमुच्यते॥
आसनस्य प्रदानेन सौभाग्यं मुक्तिमाप्नुयात्।
चमरो रौहितो न्यङ्कुः सम्बरो वभ्रुणो रुरुः॥
शशोणाहरिणाश्चेति मृगा नवविधा मताः।
हरिणाश्चापि विज्ञेयः पञ्चभेदोऽत्र भैरव॥
ऋष्यः खड्गो रुरुश्चैव पृषतश्च मृगस्तथा।
एते बलिप्रदानेषु चर्म्मदाने च कीर्त्तिताः॥
सर्व्वेषां तैजसानाञ्च आसनं ज्येष्ठमुच्यते।
आयसं वर्ज्जयित्वा तु कांस्यं सीसकमेव वा॥
शिलामयं मणिमयं तथा रत्नमयं मतम्।
आसनं देवताभ्यस्तु भुक्त्यै मुक्त्यै समुत्सृजेत्॥ *॥
अत्रैव साधकानाञ्च आसनं शृणु भैरव।
यत्रासीनः पूजकस्तु सर्व्वसिद्धिमवाप्नुयात्॥
ऐणञ्च चार्म्मणं वास्त्रं तैजसञ्च चतुष्टयम्।
आसनं साधकानाञ्च सततं परिकीर्त्तितम्॥
पूर्व्वोक्तं यच्च देवेभ्य आसनं परिकीर्त्तितम्।
तत्सर्व्वमासनं शस्तं पूजाकर्म्मणि साधके॥
न यथेष्टासनो भूयात् पूजाकर्म्मणि साधकः।
काष्ठादिकासनं कुर्य्यात् मितमेव सदा बुधः॥*॥
चतुर्विंशत्यङ्गुलेन दीर्घं काष्ठासनं मतम्।
षोड़शाङ्गुलविस्तीर्णमुत्सेधचतुरङ्गुलम्॥
षड़ङ्गुलं वा कुर्य्यात्तु नोच्छ्रितं चात्र कारयेत्।
पूर्व्वोक्तं वर्ज्जयेद्दर्व्वमासनं पूजनेष्वपि॥
वास्त्रं द्विहस्तान्नो दीर्घं सार्द्धहस्तान्न विस्तृतम्।
न त्र्यङ्गुलात्तथोच्छ्रायं पूजाकर्म्मणि संश्रयेत्॥
यथेष्टं चार्म्मणं कुर्य्यात् पूर्व्वोक्तं सिद्धिदायकम्॥
षड़ङ्गुलाधिकं कुर्य्यान्नोच्छ्रितन्तु कदाचन।
काम्बलं चार्म्मणं चैलं महामायाप्रपूजने॥
प्रशस्तमासनं प्रोक्तं कामाख्यायास्तथैव च।
त्रिपुरायाश्च सततं विष्णोश्चापि कुशासनम्॥
बहुदीर्घं बहूच्छ्रायं तथैव बहुविस्तृतम्।
दारुभूमिसमं प्रोक्तमश्मापि सर्व्वकर्म्मणि॥